श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तषष्टितमः सर्गः ॥

## च्यवनेन शत्रुघ्नं प्रति लवणासुरशूलशक्तिं परिचाययता पूर्वघटितस्य राज्ञो मान्धातुर्वधस्य श्रावणम्

अथ रात्र्यां प्रवृत्तायां शत्रुघ्नो भृगुनन्दनम्।
पप्रच्छ च्यवनं विप्रं लवणस्य यथाबलम्॥ **7.67.1** ॥

शूलस्य च बलं ब्रह्मन् के च पूर्वं विनाशिताः।
अनेन शूलमुख्येन द्वन्द्वयुद्धमुपागताः॥ **7.67.2** ॥

तस्य तद् वचनं श्रुत्वा शत्रुघ्नस्य महात्मनः।
प्रत्युवाच महातेजाश्च्यवनो रघुनन्दनम्॥ **7.67.3** ॥

असङ्ख्येयानि कर्माणि यान्यस्य रघुनन्दन।
इक्ष्वाकुवंशप्रभवे यद् वृत्तं तच्छृणुष्व मे॥ **7.67.4** ॥

अयोध्यायां पुरा राजा युवनाश्वसुतो बली।
मान्धाता इति विख्यातस्त्रिषु लोकेषु वीर्यवान्॥ **7.67.5** ॥

स कृत्वा पृथिवीं कृत्स्नां शासने पृथिवीपतिः।
सुरलोकमितो जेतुमुद्योगमकरोन्नृपः॥ **7.67.6** ॥

इन्द्रस्य च भयं तीव्रं सुराणां च महात्मनाम्।
मान्धातरि कृतोद्योगे देवलोकजिगीषया॥ **7.67.7** ॥

अर्धासनेन शक्रस्य राज्यार्धेन च पार्थिवः।
वन्द्यमानः सुरगणैः प्रतिज्ञामध्यरोहत॥ **7.67.8** ॥

तस्य पापमभिप्रायं विदित्वा पाकशासनः।
सान्त्वपूर्वमिदं वाक्यमुवाच युवनाश्वजम्॥ **7.67.9** ॥

राजा त्वं मानुषे लोके न तावत् पुरुषर्षभ।
अकृत्वा पृथिवीं वश्यां देवराज्यमिहेच्छसि॥ **7.67.10** ॥

यदि वीर समग्रा ते मेदिनी निखिला वशे।
देवराज्यं कुरुष्वेह सभृत्यबलवाहनः॥ **7.67.11** ॥

इन्द्रमेवं ब्रुवाणं तं मान्धाता वाक्यमब्रवीत्।
क्व मे शक्र प्रतिहतं शासनं पृथिवीतले॥ **7.67.12** ॥

तमुवाच सहस्राक्षो लवणो नाम राक्षसः।
मधुपुत्रो मधुवने न तेऽज्ञां कुरुतेऽनघ॥ **7.67.13** ॥

तच्छ्रुत्वा विप्रियं घोरं सहस्राक्षेण भाषितम्।
व्रीडितोऽवाङ्मुखो राजा व्याहर्तुं न शशाक ह॥ **7.67.14** ॥

आमन्त्र्य तु सहस्राक्षं प्रायात् किञ्चिदवाङ्मुखः।
पुनरेवागमच्छ्रीमानिमं लोकं नरेश्वरः॥ **7.67.15** ॥

स कृत्वा हृदयेऽमर्षं सभृत्यबलवाहनः।
आजगाम मधोः पुत्रं वशे कर्तुमरिन्दमः॥ **7.67.16** ॥

स काङ्क्षमाणो लवणं युद्धाय पुरुषर्षभः।
दूतं सम्प्रेषयामास सकाशं लवणस्य सः॥ **7.67.17** ॥

स गत्वा विप्रियाण्याह बहूनि मधुनः सुतम्।
वदन्तमेवं तं दूतं भक्षयामास राक्षसः॥ **7.67.18** ॥

चिरायमाणे दूते तु राजा क्रोधसमन्वितः।
अर्दयामास तद् रक्षः शरवृष्ट्या समन्ततः॥ **7.67.19** ॥

ततः प्रहस्य तद् रक्षः शूलं जग्राह पाणिना।
वधाय सानुबन्धस्य मुमोचायुधमुत्तमम्॥ **7.67.20** ॥

तच्छूलं दीप्यमानं तु सभृत्यबलवाहनम्।
भस्मीकृत्वा नृपं भूयो लवणस्यागमत् करम्॥ **7.67.21** ॥

एवं स राजा सुमहान् हतः सबलवाहनः।
शूलस्य तु बलं सौम्य अप्रमेयमनुत्तमम्॥ **7.67.22** ॥

श्वः प्रभाते तु लवणं वधिष्यसि न संशयः।
अगृहीतायुधं क्षिप्रं ध्रुवो हि विजयस्तव॥ **7.67.23** ॥

लोकानां स्वस्ति चैवं स्यात् कृते कर्मणि च त्वया।
एतत् ते सर्वमाख्यातं लवणस्य दुरात्मनः॥ **7.67.24** ॥

शूलस्य च बलं घोरमप्रमेयं नरर्षभ।
विनाशश्चैव मान्धातुर्यत्नेनाभूच्च पार्थिव॥ **7.67.25** ॥

त्वं श्वः प्रभाते लवणं महात्मन्
    वधिष्यसे नात्र तु संशयो मे।
शूलं विना निर्गतमामिषार्थे
    ध्रुवो जयस्ते भविता नरेन्द्र॥ **7.67.26** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तषष्टितमः सर्गः॥